# संस्कृतवार्ता:
# 11.07.2024
# सायम् - 06:20

## मुख्यवार्ता:

· प्रधानमन्त्रीनरेन्द्रमोदी नीत्यायोग-भवने प्रमुखैः अर्थशास्त्रिभिः सह उवेशनम् अकरोत् ।

· नवदिल्ल्यां बंगाल की खाड़ी इति द्वितीयं बहु-क्षेत्रीय-प्रौद्योगिक्यार्थिक-सहयोगाय प्रतिबद्धानां विदेशमन्त्रिणां उपवेशनं अद्य समारब्धम् ।

· निर्वानिचनायोगस्य षड्भिस्सदस्यैः झारखण्डराज्ये विधानसभा-निर्वाचनस्य सन्नद्धता परीक्षिता।

· सर्वोच्च-न्यायालयेन नीट-स्नातक-परीक्षा-प्रकरणे न्यायिक-श्रवण-प्रक्रिया अस्य मासस्य अष्टादशदिनाङ्कं यावत् स्थगिता ।

· भारतीय ऋतुविज्ञानविभागेन देशस्य विभिन्नभागेषु वृष्टेः सम्भावना अनुमानिता उत्तरप्रदेशे च जलाप्लावन-प्रभावितानां क्षेत्राणाम् उद्धरणाय सेना समाहूता ।

## नीत्यायोगः-प्रधानमन्त्री

प्रधानमन्त्रीनरेन्द्रमोदी केन्द्रीय-आय-व्यय-सङ्कल्पपत्रस्य प्रस्तुतेः प्राक् नीत्यायोग-भवने प्रमुखैः अर्थशास्त्रिभिः सह उवेशनम् अकरोत् । उपवेशनेऽस्मिन् वित्तमन्त्री- निर्मलासीतारामनः नीत्यायोगस्य उपाध्यक्षा सुमनबेरी प्रधानमन्त्रिणः प्रमुखसचिवः पी के मिश्रः शीर्षाः अर्थशास्त्रिणः, अर्थशास्त्रविशेषज्ञाश्च समुपविष्टाः आसन् । संसदः आय-व्यय-प्रतिवेदनात्मकं सत्रं जुलाईमासस्य द्वाविंशति-दिनाङ्कतः समारभते अग्रिमे च दिवसे वित्तमन्त्री निर्मलासीतारामनः लोकसभायां सत्रस्यास्य केन्द्रीय-बजटाख्यम् आय-व्यय-सङ्कल्प-पत्रं प्रस्तोष्यति । ध्यातव्यम् अस्ति यत् नरेन्द्रमोदिनः तृतीयकार्यकालस्य इदं प्रथमं सङ्कल्प-पत्रं प्रस्तोष्यते ।

## जयशंकरः-बिम्स्टेक्

विदेश-मन्त्री डॉ. एस् जयशंकरः अद्य प्रोक्तवान् यत् भारताय, बिम्सटेक् तस्य प्रतिवेशिप्रथमः' , 'एक्ट ईस्ट ' ,'सागर'-दृष्टिकोणः इत्येतेषां प्रतिनिधित्वं करोति । डॉ. जयशंकरः नवदिल्ल्यां बंगाल की खाड़ी इति विषये आयोजिते द्वितीये सम्मेलने बहु-क्षेत्रीय-प्रौद्योगिक्यार्थिक-सहयोगाय प्रतिबद्धानां विदेशमन्त्रिणां उपवेशने सम्बोधयन् आसीत् । सः प्रोक्तवानम् यत् प्रत्येकं प्रयासः बंगाल-खाड़ी इत्यस्मिन् विषये विशिष्ट-ध्यानं प्रदातुं क्रियते यत्र सहयोगात्मक-क्षमता चिरकालादप्राप्या वर्तते । डॉ. जयशंकरः पुनः अकथयत् यत् विदेश-मंत्रिणां संदेशः स्पष्टः

भवितव्यःयत्  ते सर्वे बंगाल-खाड़ी -क्षेत्रस्य  देशानां मध्ये नवोर्जायै, नवसंसाधनाय, सहयोगाय च  प्रतिबद्धताम् आनेतुं प्रतिबद्धाः सन्ति । सः प्रोक्तवान् यत् क्षमता-निर्माणार्थिक-सहयोग-सदृशानि दीर्घकालिक-लक्ष्याणि सन्ति यैः सबलं प्रतिपादितं यत्  बिम्सटेक्-सदृशेन पूरकानुकूल-समूहेन निश्चितरूपेण उच्चाकांक्षाः स्वीकरणीयाः। डॉ. जयशंकरः इदमपि अकथयत् यत् रिट्रीट इत्यस्य प्रथमे भागे सम्पर्क, संस्थानिर्माण, व्यापार-व्यवसायांतरिक्ष-सहयोग, स्वास्थ्याधारभूतसंरचना , क्षमतानिर्माण चेत्यादिषु विषयेषु चर्चा करिष्यते ।

<u>झारखण्ड / निर्वाचनायोगः</u>

वरिष्ठयोः उपनिर्वाचनायुक्तयोः नितेशव्यासस्य धर्मेन्द्रशर्मणश्च अध्यक्षतायां निर्वानिचनायोगस्य षड्भिस्सदस्यैः झारखण्डराज्ये विधानसभा-निर्वाचनस्य सन्नद्धता परीक्षिता। षट्सदस्यानां दलेन झारखण्डस्य सर्वैः जनपद-निर्वाचनाधिकारिभिस्सह उपवेशनम् आचरितम् । इतः प्राक् निर्वाचनायोगेन झारखण्डस्य मुख्यनिर्वाचनाधिकारिणा सह अन्यैः निर्वाचनाधिकारिभिस्सममपि उपवेशनं समाचरितमासीत् ।

<u>सर्वोच्च-न्यायालयः-नीट</u>

सर्वोच्च-न्यायालयेन नीट-स्नातक-परीक्षा-प्रकरणे न्यायिक-श्रवण-प्रक्रिया अस्य मासस्य अष्टादशदिनाङ्कं यावत् स्थगिता । भारतस्य मुख्यन्यायाधीशस्य डी वाई चंद्रचूड़स्य अध्यक्षतायां पीठेन, केन्द्रसर्वकारेण एनटीए इत्यभिकरणेन च न्यायालये प्रख्यापिते प्रत्युत्तरे विपक्षिदलानां प्रतिक्रियायै एतत् स्थगनं कृतमस्ति । अवधेयं यत् शीर्षन्यायालये अद्य विवादास्पदं नीट-स्नातक-प्रवेश-परीक्षया सम्पृक्तासु याचिकासु श्रवणप्रक्रिया सुनिश्चितासीत् । एतासु मईमासस्य पञ्चदिनाङ्के जातायां परीक्षायाम् अनियमितता-कदाचारयोः आरोपं प्रतिपादयन्त्यः , पुनः परीक्षायाः च याचिकाः सम्मिलिताः सन्ति । बुधवासरे प्रस्तुते एकस्मिन् प्रतिवेदने , केन्द्रेण प्रोक्तं यत् , सर्वोच्चन्यायालयस्य  निर्देशानुसारं शिक्षामंत्रालयेन नीट-स्नातक-परीक्षायाः परिणामस्य व्यापकविश्लेषणाय आईआईटी-मद्रासः सम्प्रार्थितः वर्तते ।

<u>हरदीपपुरी</u>

केंद्रीय-जीवाष्मतैल-प्राकृतिक-वात्येधन-मन्त्री हरदीप-सिंह-पुरी अकथयत् यत् सर्वकारस्य उद्देश्यं अन्वेषणोत्पादन-गतिविधिनाम् अन्तर्गतं त्रिंशदुत्तर-द्विसहस्रतमाब्दं यावत् देशस्य अन्वेषण-क्षेत्रं सम्वर्ध्य दशलक्ष-वर्ग-किलोमीटर-मितं  कर्तुम् अस्ति । श्रीपुरी अद्य नवदिल्ल्याः भारत-मण्डपम् इत्यस्मिन् स्थले  हाइड्रोकार्बन-महानिदेशालयेन आयोजितं 'ऊर्जा वार्ता' इति कार्यक्रमं संबोधयन् आसीत् ।  सः प्रोक्तवान् यत् सर्वकारेण सूचनाधारितस्य अन्वेषणस्य सम्वर्धने बृहन्निवेशः कृतः

अस्ति । श्री-पुरी पुनः अकथयत् यत् हाइड्रोकार्बनान्वेषणस्य, विकासस्य विशिष्टार्थिकक्षेत्रस्य, नवीन-भूकंपसम्बद्धसूचनायाः च अधिग्रहणे पञ्चशत-कोट्यधिक-सप्तसहस्र-रूप्यकाणां निवेशः क्रियते ।

जेपीनड्डा

केंद्रीय-स्वास्थ्य-मंत्री जगत-प्रकाश-नड्डा इत्यनेन विश्व-जनसंख्या-दिवसावसरे अद्य नवदिल्ल्यां परिवार-नियोजनाय सुगम-प्रतिदर्शस्य अनावरणं विहितम् । विभिन्न-राज्याणां स्वास्थ्य-परिवार-कल्याण-विभागैः सह जाते एकस्मिन् आभासीयोपवेशने श्री-नड्डा प्रोक्तवान् यत् अद्य भारते परिवार-नियोजनस्य अतीत-वर्तमान-भविष्याणाम् आत्मनिरीक्षणावसरः अस्ति । सः प्रोक्तवान् यत् आगामि रणनीतयः राष्ट्रिय-परिवार-स्वास्थ्य-सर्वेक्षणस्य सूचकाङ्कैः सह प्रतिस्थापनीयाः सहैव उच्च-जनसंख्या-समन्वितेषु राज्येषु विशिष्ट-ध्यानं प्रदातव्यम् ।

ऋतुविज्ञानविभागः

भारतीय ऋतुविज्ञानविभागेन सूचितं यत् सोमवासरं यावत् कोंकण-गोवाभ्यां सह मध्य-महाराष्ट्रस्य केषुचित् भागेषु, तटीय-कर्णाटके च सघनवर्षायाः सम्भावना अस्ति । गुजरातप्रदेशे अपि अग्रिम-दिनत्रयं यावत् वर्षाधिक्यस्य सम्भावना प्रबला अस्ति । विभागेन एतदपि प्रोक्तं यत् पश्चिमबङ्गालः-सिक्किम-मेघालय-बिहारप्रदेशेषु अद्य वर्षा भवितुं शक्नोति । तथैव उत्तरप्रदेश-मध्यप्रदेशयोः केषुचित् भागेषु अपि वर्षायाः सम्भावना अस्ति ।

उत्तरप्रदेश-जलाप्लावनम्

भूरिशः वर्षात्वेन उत्तरप्रदेशस्य कतिपयभागाः जलमग्नाः जाताः । जलाप्लावनात् रक्षणाय आपदुद्धाराभियाने सेना समाकलितास्ति । केन्द्रीय-मध्य-सूर्या-कमाण्ड इत्याख्येन सैन्यांश-द्वयं शाहजहाँ-पुर-मण्डलं प्रति प्रेषितमस्ति । गर्रा-खन्नौत-नद्योः धारायां सम्प्रत्यपि सार्धद्विशताधिकाः जनाः अवरुद्धाः सन्ति । एतन्मध्ये मुख्यमन्त्री योगी आदित्यनाथः अद्य श्रावस्ती-बलरामपुर-जनपदयोः जलाप्लावित-क्षेत्रयोः परिभ्रमणे अस्ति । उत्तरप्रदेशस्य द्वादशजनपदानां त्रयस्त्रिंशदधिक-षट्-शतं ग्रामाः सङ्कटापन्नाः सन्ति । जलाप्लावेन शतशः योजनपरिमिता कृषियोग्या भूमिः जलमग्ना अस्ति । अष्टलक्षाधिकाः जनाः प्रभाविताः सन्ति । ऋतुविज्ञानविभागेन गोवाप्रदेशाय अपि रक्तवार्णिकी सञ्चेतना प्रसारिता अस्ति । उत्तराखण्डे च बद्रीनाथ-राष्ट्रियराजमार्गः चमोली-जनपदे अद्य तृतीयेऽपि दिने अवरुद्धः अस्ति । कारणं च अस्ति य़त् जोशीमठं निकषा भूस्खलनमिति ।

।। इति वार्ता: ।।